15. पञ्चदशः पाठः

## वीराङ्गना लक्ष्मीबाई

लङ् - लकारः, भूतकालः

अस्माकं राष्ट्रं भारतवर्षम् । 1947 (एकसहस्र-नवशत-सप्तचत्वारिंशत्) तमे ईश्वीये वर्षे भारतदेशः स्वतन्त्रः अभवत् । आँग्लदेशीयाः अत्र शासनम् अकुर्वन् । स्वाधीनतायै अनेकानि आन्दोलनानि अभवन् । स्वतन्त्रतायै देशभक्ताः धनम् अयच्छन् । युवकाः स्वप्राणान् अत्यजन् । लक्ष्मीबाई एका प्रमुखा सेनानायिका आसीत् । तस्याः जनकः जननी च बिठूरराज्ये अवसताम् । लक्ष्मीबाई शस्त्रज्ञाने अश्वारोहणे च निपुणा आसीत् । तस्याः विवाहः गङ्गाधरेण सह अभवत् । गङ्गाधररावस्य असमये एव मृत्युः अभवत् । आँग्लसेनानायकः ह्यूरोजः अकथयत् - "राज्ञी आत्मसमर्पणं करोतु" इति । वीराङ्गना लक्ष्मीबाई अवदत् - "भारतीया नारी प्राणान् त्यजति । किन्तु शत्रोः अग्रे समर्पणं न करोति । झाँसी-राज्यं मम अस्ति । अहं झांसी-राज्यं न दास्यामि" इति ।

सा आँग्लैः सह भीषणं युद्धम् अकरोत् । अन्ते सा प्रणान् अत्यजत् । अद्यापि झाँसीदुर्गे गुञ्जितान् स्वरान् जनाः स्मरन्ति ।